# परमपूज्य श्री बालकृष्ण दास जी स्तुति

सरसिज मधुरास्यं पञ्चकेशाभिकाश्य
'अलि' - ललितमुपास्यं शीतलं नन्दहास्यम् ।
प्रियतम - रति-रासे वेणु कुञ्जाधिवासे
मधुर-रस- विलासं श्री बालकृष्णं नमामि ॥१॥

प्रेमोल्लास-विलास-गीति मुखरैर्भृगैर्शतेर्भूषिता
भाव-स्निग्ध- सुगन्ध-घी-सुमनसां वृन्दैः सदाराधिता।
तन्वी-श्याम-तमाल-लग्न-मधुरा कुञ्जोदरे सुन्दरे
नृत्यन्ती रस-वल्लरी विजयते श्री बालकृष्णाभिधा ॥२॥

नृत्यन्नेत्र-कटाक्ष-हास-मदिरं रूपं परं सुन्दरं
पीत्वा चक्षुमुखेन मुग्धनयना मुर्छामिता विस्मिता ।
प्रीत्या सा सरसाङ्गव्यष्टि-विकला वाष्पाकुला कम्पिता
श्यामेनाङ- समाश्रिता विजयते श्री बालकृष्णाभिधा ॥३॥

आलित्वं नवमल्लिकासि कलिका बाले सुधा-मञ्जरि
भद्रं तेऽस्ति शुभागमं प्रियसखि प्राणाधिका वल्लभे ।
आश्लिष्यं प्रतिनंद्य चारू-वचनैरुत्कण्ठितै रोमभिः
कृष्णेनाभिहिता प्रिया विजयते श्री बालकृष्णाभिधा ॥४॥

कालिन्दी-पुलिने निकुञ्ज-भवने दिव्ये तु वृन्दावने
राधा-कृष्ण-विलास-हास-ललिता लीला मयि स्फूर्जतु ।
प्रेमा-भक्तिमननरुनिर्भरगतिं सद्यः प्रसादीकुरू
इत्थं त्वामप्रियाचितो विजयते श्री बालकृष्णाभिधा ॥ ५॥

॥ परम पूज्य श्री महाराज जी की जय ॥

https://bhajanganga.com/bhajan/lyrics/id/30371/title/parampujya-shree-balkrishna-das-ji-maharaj-ji-stuti

अपने Android मोबाइल पर BhajanGanga App डाउनलोड करें और भजनों का आनंद ले |